दि० 27-4-21 उपशास्त्री प्रथम वर्ष, विषय- व्याकरण

ग्रन्थ - सिद्धान्त कौमुदी (अजन्त पुल्लिङ्ग प्रकरणम्)

1 हरयः — हरि शब्दात् अर्थवदिति सूत्रेण प्रातिपदिक संज्ञायाम्, स्वौजस् इति सूत्रेण तथा ङ्याप्प्रातिपदिकात् एवं बहुषु बहुवचनम् इति सूत्र द्वय सहकारेण हरि शब्दात् जस् विभक्तौ अनुबन्धलोपे, हरि-अस् इति दशायां जसि च इति सूत्रेण गुणे, एचोऽयवायावः इति सूत्रेण अयादेशे सकारस्य रुत्वे विसर्गे हरयः इति सिद्धम्।

2 हरिणा — हरि शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम्, स्वौजस् इति सूत्रेण तथा ङ्याप्प्रातिपदिकात् एवं द्व्येकयोर्द्विवचनैकवचने इति सूत्र द्वय सहकारेण हरि शब्दात् तृतीयैकवचने टा विभक्तौ शेषो घ्यसखि इति सूत्रेण घि संज्ञायाम्, घित्वात् आङो नाऽस्त्रियाम् इति सूत्रे नादेशे सति, अट्कुप्वाङ्नुम् व्यवायेऽपि इति सूत्रेण णत्वे सति हरिणा इति सिद्धम्

3 हरये — हरि शब्दात् अर्थवदिति सूत्रेण प्रातिपदिक संज्ञायाम्, स्वौजस् इति सूत्रेण तथा ङ्याप्प्रातिपदिकात् एवं द्व्येकयोर्द्विवचनैकवचने इति सूत्र द्वय सहकारेण चतुर्थ्येकवचने ङे विभक्तौ, अनुबन्ध लोपे। शेषो घ्यसखि इति सूत्रेण घि संज्ञायाम् घित्वात् घेर्ङिति इति सूत्रेण गुणे, एचोऽयवायावः इति सूत्रेण अयादेशे सति हरये इति सिद्धम्।

4 हरेः — हरि शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम्, स्वौजस् इति सूत्रेण तथा ङ्याप्प्रातिपदिकात् एवं द्व्येकयोर्द्विवचनैकवचने इति सूत्र द्वय सहकारेण ङस् विभक्तौ अनुबन्धलोपे। शेषो घ्यसखि इति घि संज्ञायाम्, घेर्ङिति इति सूत्रेण गुणे हरे अस् इति दशायां ङसिङसोश्च इति सूत्रेण पूर्वरूपे सस्य रुत्वे विसर्गे हरेः इति सिद्धम्

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
रुद्रवलि सेता पूर्णिया

दि० २१-५-२१ उपशास्त्री प्रथम वर्ष - विषय - व्याकरण

लघु-सिद्धान्त कौमुदी (अजन्त पुल्लिङ्ग प्रकरणम्)

१ हरीणाम् – हरि शब्दात् अर्थवदिति सूत्रेण प्राति-पदिक संज्ञायाम्, स्वौजस् इति सूत्रेण तथा ङ्याप् प्रातिपदिकात् एवं बहुषु बहुवचनम् इति सूत्र द्वय सहकारेण हरिशब्दात् आम् विभक्तौ, ह्रस्वनद्यापो नुट् इति सूत्रेण नुडागमे अनुबन्धलोपे नामि इति सूत्रेण दीर्घे, अट्कुप्वाङ्नुम्व्यवायेऽपि इति णत्वे हरीणाम् इति सिद्धम्।

२- हरौ – हरि शब्दात् अर्थवदिति सूत्रेण प्रातिपदिक संज्ञायां, स्वौजस इति सूत्रेण तथा ङ्याप् प्रातिपदिकात् एवं द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहकारेण ङि विभक्तौ, शेषो घ्यसखि इति सूत्रेण घि संज्ञायाम् अच्च घेः इति सूत्रे ङ औत, घेर्ङिति घित्वात् घेर्ङिति सूत्रेण गुणप्राप्ते तं प्रबाध्य अच्च घेः इति सूत्रेण ङ औत तथा घित्वात् इकारस्य स्थाने अकारादेशे सति पुनः वृद्धिरेचि इति सूत्रेण वृद्धौ हरौ इति सिद्धम्।

३ सखा – सखि शब्दात् अर्थवदिति प्रातिपदिक संज्ञायां, स्वौजस् इति सूत्रेण तथा ङ्याप् प्रातिपदिकात् एवं द्व्येकयोर्द्विवचनैकवचने इति सूत्र द्वय सहकारेण सखि शब्दात् सौ अनुबन्ध लोपे। अनङ् सौ इति सूत्रेण इकारस्य स्थाने अनङ् आदेशे अनुबन्ध लोपे सखन्-स् इति जाते। अलोऽन्त्यात् पूर्व उपधा इति सूत्रेण उपधा संज्ञायाम्, सर्वनामस्थाने चासम्बुद्धौ इति सूत्रेण उपधा दीर्घे, अपृक्त एकाल्प्रत्ययः इति सूत्रेण अपृक्त संज्ञायाम्, हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् इति सुलोपे, नलोपः प्रातिपदिकान्तस्य इति नलोपे सति सखा इति सिद्धम्।

अमरनाथ मिश्र
उ० शा० प्र० व्याकरण
रा० उ० सं० म० वि०
मलसेरा पूर्णिया